Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 3 | ISSN : 2582-0095

# व्याकरणशास्त्रस्य महत्ता



**खुशबू कुमारी**
**शोधच्छात्रा, व्याकरणविभागः**
**केन्द्रियसंस्कृतविश्वविद्यालयः, जयपुरपरिसरः**
**जयपुरम् (राजस्थानम्) भारतम्**

**Article Info**
Volume 3 Issue 5
Page Number: 06-10
Publication Issue :
September-October-2020

**Article History**
Accepted : 01 Sep 2020
Published : 09 Sep 2020

**शोधसारांशः** यथोच्यते मुखं व्याकरणं स्मृतम्। अर्थात् संस्कृतभाषायाः प्राणभूतत्वमस्ति व्याकरणशास्त्रम्। अतएव उच्यते-

**यद्यपि बहुनाधीषे तथापि पठपुत्रव्याकरणम्।**
**स्वजनः श्वजनो माभूत् सकलं शकलं सकृत् शकृत्॥**

अर्थात् यदि अस्माभिः शुद्ध संस्कृतभाषायाः प्रयोगः करणीयम् तर्हि संस्कृतव्याकरणस्य शरणं तु गन्तव्यमेव। एवञ्च अशुद्धोच्चारणेन भाषा न केवलं हास्यताम् याति अपितु अर्थस्य अनर्थमपि जायते। अतएव उच्यते **एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुक् भवति**। अतः संस्कृतभाषायाः वर्णप्रक्रियां वाक्यसंरचनायां भाषासौन्दर्यञ्च अभिज्ञातुं व्याकरणस्य उपादेयता भवत्येव। संस्कृतस्य व्याकरणं यथा शुद्धं, सूत्रात्मकं परिष्कृतं वैज्ञानिकी चास्ति तथा अन्याः कस्यापि भाषायाः व्याकरणं नास्ति। विश्वस्य कस्यापि भाषायाः व्याकरणे एतादृशी सूक्ष्मदृष्टिः वर्णानां विषये, प्रयोगानां विषये, भाषायाः विषये च न प्राप्यते।

मुख्य शब्द – महत्ता, संस्कृतभाषा, व्याकरणम्, प्रकाशः, मानवः, प्रकृति, प्रत्ययः।

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

भाष्यतेऽनेयति भाषेति। भाषयैव लोके मनुष्याणाम् अन्तर्निहितभावानां प्रकाशः भवति। भाषायाश्च सुव्यवस्थापनार्थं व्याकरणस्यावश्यकता भवत्येव। मनुष्येषु पारस्परिकभावविनिमयार्थं भाषा प्रमुखं साधनं भवति। अनया भाषायैव मानवः पशुभ्यः श्रेष्ठतम इत्युच्यते। प्रारम्भकाले भाषायाः प्रवृत्तिनिमित्तं किं? विकासश्च भाषायाः कथम् अभूत् इत्यस्मिन् विषये भारतीया ऋषिमुनिपरम्परा ज्ञापयति – स्वम्भूः ब्रह्मा एव आद्यन्तरहितां वेदरुपां वाचं ऋषिभ्योऽदात्। वेदरुपाया वाच एव लौकिकभाषाया विकासोऽभूत इति। अस्मिन् विषये भगवान् मनुरपि स्वीकरोति—

**सर्वेषां तु नामानि कर्माणि च पृथक्-पृथक्।**

**वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥**

लौकिकसंस्कृतस्य विकासो विभागो वा वेदेभ्य एवाभूत्, तत्रैव वेदे निहितज्ञान-विज्ञानानि प्रकाशयितुं बहूनि शास्त्राणि महर्षिभिः रचितानि। तेषां-तेषां सम्यगवबोधाय वेदस्य सम्यक् अवबोधमावश्यकं विज्ञाय षडङ्गज्ञानमावश्यमूचुराचार्याः। तानि च षडङ्गानि-शिक्षाकल्पनिरुक्तव्याकरणछन्दोज्योतिषाणि।

उक्तञ्च पाणिनिशिक्षायाम्—

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**

इति शिक्षावचनाद् षड्सुपि वेदाङ्गेषु व्याकरणमेव मुखमिव प्रमुखतामावहति। शरीरिणोऽङ्गेषु यथा मुखं प्रधानं तथैव वेदस्य षड्सु अङ्गेषु व्याकरणं प्रधानम्। मुखमिव प्रधानतत्त्वात् मुख्यं व्याकरणं वेदानामर्थप्रकाशनाय सर्वैः ऐकमत्येनाङ्गीक्रियते। अतो भाष्यकारः पतञ्जलिः 'रक्षोहागलघ्वसन्देहाः प्रयोजनम्' इति ब्रुवन् वेदरक्षार्थं व्याकरणध्ययनं प्रादर्शयत्। प्रास्तौच्चागमं "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, षडङ्गेषु प्रधानं व्याकरणम्, प्रधाने च कृते यत्नः फलवान् भवति इति।"

व्याकरणे प्रकृति प्रत्ययविचारः, उदात्तादिस्वरविचारः, उदात्तादिस्वरसंचारनियमाः, सन्धिनियमाः, धातुरूप-धातुरूपादिनिर्माणनियमाः, प्रकृतेः प्रत्ययस्य च स्वरूपावधारणं तदर्थनिर्धारणं चेति विविधा विषया

विविच्यन्ते। वेदेषु प्रकृतिप्रत्ययविचारस्य स्वरस्य च महन्महत्त्वमिति तत्र व्याकरणमेव साहाय्यमनुतिष्ठतीति षडङ्गेषु व्याकरणमेव प्रधानम्।

संस्कृतव्याकरणं प्रातिशाख्यमूलकमेव। वेदानां प्रातिशाख्यम् आश्रित्य व्याकरणग्रन्था आसन् ते च प्रातिशाख्यग्रन्था इति पप्रथिरे।

विद्वांसः व्याकरणस्य दृष्टादृष्टफलदायकत्वात् व्याकरणाध्ययनमुत्तमं तपस्तथा च व्याकरणं वेदस्य अत्युपकारकं प्रधानमङ्गं मन्यन्ते। तथा चोक्तम्—

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**

**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥**

व्याकरणमेव मोक्षस्य द्वारम्—

**तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥**

इदमेव व्याकरणं मुमुक्षूणां कृते मोक्षस्य प्रथमं सोपानमपि विद्यते। तथाहि—

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।**

**इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥**

नामरूपात्मकं जगदेव शब्दब्रह्म तदेव स्फोटरूपं विद्यते। अतः शब्दब्रह्म तदेव स्फोटरूपं विद्यते। अतः शब्दस्य महनीयतां प्रकटयन् महावैयाकरणो भर्तृहरिः आह—

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**

पाणिनीयव्याकरणे एकं सूत्रं समायाति 'सुप्तिङन्तं पदम्' अत्र पाणिनिः सुबन्तस्य तिङन्तस्य च पदसंज्ञा करोति तथा च वदति यत् भाषायां यत् किमपि भवति तत् सुबन्तं भवति अथवा तिङन्तम्। अर्थात् जगति विद्यमानं प्रत्येकं पदार्थं वस्तुसत्ता वा नाम अथवा आख्यातपदेन एव ज्ञायते। नामाख्यातौ विहाय जगति अथवा भाषायां किमपि न शिष्यते। एकवारं क्षणमात्रकाले चिन्तयामः यत् संसारस्य वस्तुनाम् अथवा सत्तानां नाम यदि न स्यात् तर्हि अस्माकं स्थितिः कीदृशी भविष्यति? अर्थात् वयं नाम विना व्यवहार कर्तुं सक्षमाः न भवामः तथा जगति

नास्ति तादृशी कापि भाषा यस्यां सुबन्तानि तिङन्तानि च न स्युः। एतादृश्याः भाषायाः कल्पना असम्भवा यत्र नामाख्यातौ न भवतः। अतः अनेन सिध्यति यत् पाणिनीयं व्याकरणं भाषावैज्ञानिकं सर्वं भाषाव्याकरणम्। एवमनेकानि सिद्धान्तानि सन्ति यानि सर्वासु भाषासु दृश्यन्ते यानि पाणिनीयव्याकरणे सन्ति।

भाषाविषयकं वाणीविषयकं वा चिन्तनं व्याकरणे विद्यते, यच्चिन्तनमन्यत्र कस्यामपि भाषायां प्राप्तुं न शक्यते। एतच्चिन्तनमेव सर्वासां भाषाणां सिद्धान्तरुपेण उपस्थाप्यते।

व्याकरणे महाभाष्यस्य चिन्तनं न केवलं संस्कृतस्य कृते अपितु सर्वासां भाषाणां कृते सिद्धान्तं प्रस्तौति। भारतीयचिन्तनपरम्परायां च शब्दशास्त्रमेव व्याकरणस्य प्रधानविषयः नास्ति अपितु काव्यशास्त्रस्य, दर्शनशास्त्रस्य अध्यात्मस्य च विवेच्य विषयः अस्ति। भाषाविज्ञानमपि पाणिनीयव्याकरणस्य नियमान् सार्वभौमत्वेन अङ्गीकरोति। व्याकरणेन कस्यापि भाषायाः शुद्धतया वाचन-पठन-लेखनकौशलानां विकासो सम्भवति। विश्वस्मिन् विश्वे नैकाः भाषाः विद्यन्ते। तासु देववाणी सरस्वती संस्कृतभाषा सर्वप्राचीना सर्वासां भाषाणां च जननी इति भण्यते। दण्डी वदति- "**संस्कृतं हि दैवी वागन्वाख्याता महर्षिभिः** इति"।

**व्याकरणशब्दार्थः-**

वि, आङ् इत्युपसर्गाभ्यां कृञ् धातोः करणाधिकरणयोश्च इति सूत्रेण ल्युट् प्रत्यये व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम् इति व्यत्पत्त्या निष्पन्नोऽयं व्याकरणशब्दः। अपशब्देभ्यो विविच्य साधुशब्दाः येन ज्ञायन्ते तद्याकरणम्। प्रकृतिप्रत्ययविभाजनद्वारा साधुशब्दरूपं येन आख्यायते तद्याकरणम्। व्याकरणस्य नामान्तरं शब्दानुशासनम् इति। महाभाष्ये उच्यते- अथ शब्दानुशासनम्, केषां शब्दानां लौकिकानां वैदिकानाञ्च इति। वेदस्य षडङ्गेषु व्याकरणं मुख्यमुच्यते। यथा- मुखं व्याकरणं स्मृतम् इति। महाभारते उद्योगपर्वाणि उच्यते-

**सर्वाथानां व्याकरणाद् वैयाकरण उच्यते।**

**तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा॥**

न्यायभाष्ये वात्सायनेनोक्तम्-

"**समयपालनार्थञ्चेदं पदलक्षणायाः वाचोऽन्वाख्यानं व्याकरणम्** इति।"

पराशरपुराणे उच्यते-

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥**

**सन्दर्भग्रन्थाः**


1. अवस्थी, शिवशङ्करः(सम्पादकः) (२०१०) : 'भर्तृहरिः-वाक्यपदीयम्', चौखम्बा प्रकाशन वाराणसी।
2. आचार्यः,गोविन्दः (सम्पादकः) (२०११) : 'भट्टोजिदीक्षितः-वैयाकरणसिद्धान्तकौमुदी', , चौखम्बा सुरभारती प्रकाशन वाराणसी।
3. चन्द्रः, ईश्वरः (सम्पादकः) (२००४) : 'पाणिनिः-अष्टाध्यायी', चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली।
4. चौधरी, अर्कनाथः (सम्पादकः) (२०११) : 'वरदराजाचार्यः-लघुसिद्धान्तकौमुदी', जगदीश संस्कृत पुस्तकालय, जयपुर।
5. शास्त्री, भार्गव, (सम्पादकः) (२००२) : 'पतञ्जलिः-व्याकरणमहाभाष्यम्', चौखम्बा प्रकाशन वाराणसी।
6. उद्योगपर्वम्, महाभारतम्।
7. पराशरपुराणम्।
8. जिज्ञासु, ब्रह्मदत्तः (सम्पादकः) (२००२) : 'पाणिनिः-धातुपाठः', रामलाल कपूर ट्रस्ट, रेवली, सोनीपत।